International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(3): 117-125
© 2021 IJSR
www.anantaajournal.com
Received: 20-03-2021
Accepted: 23-04-2021

डॉ. नृसिंहनाथगुरुः
सहायकाचार्यः, कलियाचक-विक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयः हेडिया, पूर्वमेदिनीपुरम्, पश्चिमबङ्गः, भारत

Corresponding Author:
डॉ. नृसिंहनाथगुरुः
सहायकाचार्यः, कलियाचक-विक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयः हेडिया, पूर्वमेदिनीपुरम्, पश्चिमबङ्गः, भारत

गुणतत्त्व-विमर्शः

डॉ. नृसिंहनाथगुरुः

प्रस्तावना

यद्यपि आचार्य्याणां काव्यलक्षणविषये बहूनि मतानि परिलक्ष्यन्ते तथापि सर्वे आचार्य्याः काव्येषु गुणान् स्वीकुर्वन्ति। गुणद्वारेण च काव्यस्यात्मानं विवेचयन्ति। षड्विधेषु सम्प्रदायेषु रससम्प्रदायस्य प्रधानाचार्यः भरतमुनिः नाट्यशास्त्रे काव्ये गुणानां श्रेष्ठत्वं स्वीकृत्य तेषां स्वरूपमेवं प्रतिपादयति-

"**दोषविपर्ययं गुणः।**" [1]

अर्थात् यत्र दोषस्य नाशो भवति तत्र गुणस्योदयो भवति। तस्य विचारे यथा लोके शौर्य्यवीर्य्यप्रभृतयः गुणाः आत्मनः शोभां वर्द्धयन्ति तथात्मभूतस्य रसस्य माधुर्य्यादयः गुणाः शोभां वर्द्धयन्ति। अलङ्कारसम्प्रदायस्य प्रतिपादकः भामहः कथयति –

माधुर्य्यमभिवाच्युतः प्रसादश्च सुमेधसा।
केचिदोजऽभिश्चितवन्तः.....। [2]

माधुर्य्य-ओज-प्रसादाख्याः त्रयः गुणाः काव्यस्य सौन्दर्यं वर्द्धयन्ति। वाग्भट्टालङ्कारस्य रचयिता वाग्भट्टः गुणालङ्कारभूषितं स्फुटरिति रसोपेतं साधुशब्दार्थसन्दर्भं काव्यमिति स्वीकृतवान्। असौ गुणमदोषयोः शब्दार्थयोः धर्मरूपेण स्वीकरोति। एतस्य विचारे गुणं विना अदोषौ शब्दार्थौ न प्रसस्यते। यथोक्तम् –

"**अदोषौ अपि शब्दार्थौ प्रसस्येते न यैः विना।**" [3]

सरस्वतीकण्ठाभरणकारः भोजराजः काव्यलक्षणे गुणस्य प्राधान्यं स्वीकरोति। तद्यथा –

"निर्दोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम्।
रसान्वितं कविः कुर्वन् कीर्त्तिं प्रीतिं च विन्दति॥" [4]

अर्थात् निर्दोषमलङ्कारयुक्तं रसान्वितं गुणवत् वाक्यं काव्यं भवति। तस्य मते गुणः काव्यस्य नियतधर्मविशेषः भवति। गुणं विना काव्यमकाव्यं भवति। यदुक्तम् –

"उत्कर्षवान् गुणः कश्चिदुक्तेर्यस्मिन् प्रतीयते।" [5]

पुनरपि तेनोक्तम् –

"अलङ्कृतमपि श्राव्यं न काव्यं गुणवर्जितम्।
गुणयोगस्तयो मुख्यौ गुणालङ्कारयोगयोः॥" [6]

अर्थात् अलङ्कारसत्त्वेऽपि गुणवर्जितं वाक्यं कदापि काव्यपदवाच्यं नैव भविष्यति। काव्यादर्शे दण्डिनोक्तम् –

"श्लेषः प्रसादः समता माधुर्य्यं सुकुमारता।
अर्थव्यक्तिरूदारस्त्त्वमोजः कान्तिः समाश्चयः॥
इति वैदर्भमार्गस्य प्राणाः दशगुणाः स्मृताः।
एषां विपर्य्ययः प्रायो दृश्यते गौड वर्त्मनि॥" [7]

अर्थात् गुणाः शब्दार्थयोरुत्कर्षधायकत्वात् श्लेषादि वैदर्भमार्गस्य वैदर्भरीतिमत्काव्यबन्धस्य प्राणाः प्राणवत् उज्जीवकाः सन्ति।
वामनाचार्यः रीतिं काव्यस्यात्मा रूपेण स्वीकरोति। असौ रीतिलक्षणे कथयति –

"विशिष्टा पदरचना रीतिः विशेषो गुणात्मा" [8] इति।

एतेन ज्ञायते यत् तदा रीतिः काव्यस्यात्मा भवति यदा विशेषगुणद्वारेण शोभाविमण्डिता भवति। यथा लोके शौर्य्यवीर्य्यादयो गुणाः मनुष्यशरीरे कान्तिं विवर्द्धयन्ति तथैव शब्दार्थमयत्वरूपकाव्ये माधुर्य्य-ओज-प्रसाद-प्रभृतयः गुणाः रसादिमयकाव्यस्य कान्तिं वर्धयन्ति।
ध्वनिवादिनः त्रिविधेषु ध्वनिषु रसध्वनिः सर्वश्रेष्ठः इति स्वीकुर्वन्ति। तमेव अङ्गीभूतं रसं ये आश्रयन्ति ते गुणाः इति निगदन्ति। यदुक्तमानन्दवर्धनेन –

"तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः।"[9]

ये तावत् रसादिलक्षणं तमङ्गिनं साक्षात् आश्रयन्ते ते गुणाः भवन्ति। एते गुणाः रसस्य अङ्गीभूतस्य स्थिरधर्मा अपि भवन्ति। मम्मटः गुणविषये कथयति –

"ये रसस्याङ्गिनो धर्माः शौर्य्यादय इवात्मनः।
उत्कर्षहेतवस्तेस्युरचलस्थितयोगुणाः॥" [10]

किञ्च –

"गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता" इति।

अलङ्काराः शब्दार्थयोः धर्माः। यदुक्तम् –

"उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः॥" [11]

साहित्यशिरोमणिः आचार्यविश्वनाथः साहित्यदर्पणे गुणस्वरूपमेवं प्रतिपादयति –

"रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा।" [12]

अर्थात् शौर्यादयः यथा आत्मनः उत्कर्षं वर्द्धयन्ति तथा गुणाः काव्यात्मनः रसस्योत्कर्षं वर्द्धयन्ति। किञ्च –

"उत्कर्षहेतवः प्रोक्ताः गुणालङ्काररीतयः।" [13]

अस्मात् गुणाः काव्यस्य शोभाधायकाः उत्कर्षहेतवः सन्ति। गुणाः न केवलं रसस्य धर्मा अपि तु शब्दार्थधर्माः इति सर्वे आचार्य्याः निगदन्ति। रसगङ्गाधरकारः पण्डितराजजगन्नाथः रसगङ्गाधरे गुणविषये स्वकीयं शाणितं मतमुपस्थापयति तद्यथा – प्रयोजकत्वं चादृष्टादिविलक्षणं शब्दार्थरसरचनागतमेव ग्राह्यम्, अतो न व्यवहारातिप्रसक्तिः। अपि च –
"शब्दार्थयोरपि माधुर्यादेरीदृशस्य सत्वादुपचारो नैव कल्प्यः, इति तु मादृशाः।" [14]
अर्थात् गुणः वस्तुतः रसस्य धर्मः। परन्तु परम्परया "आकारेण सूर इति वत्" शब्दार्थयोरपि धर्मः भवति।

अतः रस-धर्मत्वे सति गुणः परम्परया शब्दार्थयोः धर्मः भवति।

रीतिः काव्ये नियततया न तिष्ठति। यतः शृङ्गाररसवर्णने दीर्घसमासा रौद्ररसवर्णनकाले च स्वल्पसमासा संघटना परिलक्ष्यते। गुणस्तु सर्वदैव तिष्ठति अपरिहार्य्यतत्त्वेन। अतः "रसो वै सः" [15] इति वचनानुसारं साहित्यिकाः ब्रह्मस्वरूपरसप्रसिद्ध्यर्थं गुणः प्रधानसहायकः इति स्वीकुर्वन्ति।

गुणसंख्यानिरूपणम् –

आलङ्कारिकेषु भरतमुनि-दण्डि-वाग्भट्टादयः विद्वांसः दशसंख्यकान् गुणान् स्वीकुर्वन्ति। वामनादयः दशशब्दगुणान् दश-अर्थगुणान् अर्थात् विंशतिसंख्यकान् गुणान् स्वीकुर्वन्ति। ते यथा

"श्लेषः प्रसादः समता माधुर्य्यं सुकुमारता
अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः
ओजः प्रसाद श्लेषसमतासमाधिमाधुर्य-
सौकुमार्योदारतार्थव्यक्तिकान्तयो बन्धगुणाः॥" [16]

शब्दगुणस्वरूपं यथा -

१. ओजः –

"गाढबन्धत्वमोजः"। [17]

यथा – विलुलितमधुधारा मञ्जरीर्नर्तयन्ति।

२. प्रसादः –

"शैथिल्यं प्रसादः"। [18]

यथा – प्रसादगुणः ओजसा सह संप्लवात् सद् शुद्धस्तु दोष एवेति।

ओजः प्रसादयो साम्यं यथा –

"अथ च विषयव्यावृत्तात्मा यथाविधि सूनवे।
नृपतिककुदं दत्त्वा यूने सितातपवारणम्॥

क्वचिदोजः प्रसादादुत्कृष्टम्। यथा –

"व्रजति गगनं भल्लातक्याः फलेन सहोपमाम्।"

क्वचिदोजसः प्रसादस्योत्कर्षः यथा –

कुसुमशयनं न प्रत्यग्नं न चन्द्रमरीचयो।
न च मलयजं सर्वाङ्गीनं न वा मणियष्ट्यः॥" [19]

३. श्लेषः –

"मसृणत्वं श्लेषः"। [20]

यथा - "अस्त्युत्तरस्यां दिशि देवतात्मा। हिमालयो नाम नगाधिराजः॥" [21]

४. समता –

"मार्गाभेदः समता"। [22]

यथा –

"प्रसीद चण्डि! त्यज मन्युमञ्जसा जनस्तवायं पुरतः कृताञ्जलिः।किमर्थमुत्कम्पितपीवरस्तन द्वयं त्वया लुप्तविलासमास्यते॥" [23]

५. समाधिः –

"आरोहावरोहक्रमः समाधिः।" [24]

तत्रारोहपूर्वोऽवरोहो यथा –

"निरानन्दः कौन्दे मधुनि परिमुक्तोज्झितरसे।"

अवरोहपूर्वस्त्वारोहो यथा –

"नरा शीलभ्रष्टा व्यसन इव मज्जन्ति तरवः।"

क्रमेणारोहणाभवरोहं चेति केचित्। यथा –

"निवेशः स्वः सिन्धोस्तुहिनगिरि वीथीषु जयति।" [25]

६. माधुर्य्यम् –

"पृथकपदत्वं माधुर्यम्॥" [26]

७. सौकुमार्यम् –

"अजरठत्वं सौकुमार्यम्॥" [27]

यथा –

"निदानं निद्वैतं प्रियजनसदृकत्वव्यवसितिः।
सुधासेकप्लोषौ फलमपि विरुद्धं मम हृदि॥" [28]

८. उदारता –

"विकटत्वमुदारता॥" [29]

यथा –

"स्वचरणविनिष्टैर्नूपुरैर्नर्तकीनां झणिति रणितमासीत् तत्र चित्रं कलं च॥" [30]

९. अर्थव्यक्तिः –

"अर्थव्यक्तिहेतुत्वमर्थव्यक्तिः॥" [31]

१०. कान्तिः –

"औज्ज्वल्यं कान्तिः॥" [32]

यथा –

"कुरङ्गीनेत्रालीस्तबलितवनालीपरिसरः॥" [33]

अर्थगुणस्वरूपं यथा –

१. औजः –

"अर्थस्य प्रौढिरोजः॥" [34]

पदार्थे वाक्यवरनं यथा –

"अथ नयनसमुत्थं ज्योतिरत्रेरिबद्यौः।"

वाक्यार्थे पदाभिधानं यथा –

"दिव्येयं न भवति किं तु मानुषी।"

व्यासो यथा –

"अयं नानाकारो भवति सुखदुःखव्यतिकरः।
सुखं वा दुःखं वा भवति न भवत्येव च ततः॥
पुनस्तस्मादूर्ध्वं भवति सुखदुःखं किमपि तत्।
पुनस्तस्मादूर्ध्वं भवति न च दुःखं न च सुखम्॥"

समासो यथा –

"ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम्।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः॥"

साभिप्रायत्वं यथा –

"सोऽयं संप्रति चन्द्रगुप्ततनयश्चन्द्रप्रकाशो युवा।
जातो भूपतिराश्रयः कृतधियां दिष्ट्या कृतार्थश्रमः॥"[35]

२. प्रसादः –

"अर्थ वैमल्यं प्रसादः।" [36]

यथा –

"सवर्णा कन्यका रूपयौवनारम्भशालिनी॥"

विपर्ययस्तु –

"उपास्तां हस्तो मे विमलमणिकाञ्चीपदमिदम्॥" [37]

३. श्लेषः –

"घटना श्लेषः।" [38]

यथा –

"दृष्ट्वैकासनसङ्गते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने निमील्य विहितक्रीडासुबन्धच्छलः।
ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कोलफलकां धूर्तोऽपरां चुम्बति॥" [39]

४. समता –

"अवैषम्यं समता।" [40]

यथा –

"च्युतसुमनसः कुन्दा पुष्णोद्गमेष्वलसाद्रुमा
मलयमरुतः सर्पन्तीमे वियुक्तधृतिच्छिदः।
अथ च सवितुः शीतोल्लासं लुनन्ति मरीचयो
न च जरठतामालम्बन्ते क्लामोदयदायिनीम्॥" [41]

५. समाधिः –

"अर्थदृष्टिः समाधिः।" [42]

६. माधुर्यम् –

"उक्ति वैचित्त्यं माधुर्यम्॥" [43]

यथा –

"रसवदामृतं कः सन्देहो मधून्यपि नान्यथा
मधुरमाधिकं चूतस्यापि प्रसन्नरसं फलम्।
सकुदपि पुनर्मध्यस्थः सन् रसान्तरविज्जनो
वदतु यदिहान्यत् स्वादु स्यात् प्रियादशनच्छदात्॥" [44]

७. सौकुमार्यम् –

"अपारुष्यं सौकुमार्यम्।" [45]

यथा –

"मृतंयशः शेषमित्याहुः। एकाकिनं देवताद्वितीयमिति। गच्छति साधयेति च ।" [46]

८. उदारता –

"अग्राम्यत्वमुदारता।" [47]

यथा –

"त्वमेव सौन्दर्य्या स च रुचिरतायां परिचितः
कलानां सीमानं परमिह युवामेव भजथः।
अपि द्वन्दं दिष्ट्या तदिति सुभगे संवदति वा-
मतः शेषं चेत् स्यज्जितमिह तदानीं गुणितया॥" [48]

९. अर्थव्यक्तिः –

"वस्तुस्वभावस्फुटत्वमर्थव्यक्तिः।" [49]

यथा –

"पृष्ठेषु शङ्खशकलच्छविषु च्छदानां
राजीभिरङ्कितमलक्तकलोहिनीभिः।
गोरोचनाहरितबभ्रुबहिः पलाश-
मामोदते कुमुदमम्भसि पल्वलस्य॥" [50]

१०. कान्तिः –

"दीप्तरसत्वं कान्तिः।" [51]

यथा –

"प्रेयान् सायमपाकृतः सतपथं पादानतः कान्तया
द्वित्राण्येव पदानि वासभवनात् यावन्न यात्युन्मनाः।
तावत् प्रत्युत पाणिसंपुटलसन्नीवनीतम्बं धृतो
धावित्वैव कृतप्रणामकमहो प्रेम्णो विचित्रा गतिः॥" [52]

गुणत्रयेषु अन्तर्भावः -
वामनाचार्य्यप्रदर्शितान् दशशब्दगुणान् दशार्थगुणान् गुणत्रये अन्तर्भावयन्ति आचार्याः। "काव्यप्रकाशे" आचार्यमम्मटेन उच्यते –

"केचिदन्तर्भवन्त्येषु दोषत्यागात्परे श्रिताः।
अन्ये भजन्ति दोषत्वं कुत्रचित्न ततो दश॥" [53]

अर्थात् वामनस्य ये गुणाः (शब्दगताः) तेषु केचित् मम्मटस्य गुणत्रयेषु अन्तर्भवन्ति। अन्ये दुष्टत्वात् न गुणपदवाच्याः भवन्ति। एतद् प्रतिपाद्यते –
वामनमते यः अनेकपदानाम् एकपदवत् द्योतनात्मा श्लेषः, यः आरोह। वरोहक्रमः समाधिः, या विकटत्वलक्षणा उदारता, य ओजोमिश्रितशैथिदल्यात्मा प्रसादः, एते सर्वे मम्मटस्य ओजोगुणान्तर्भूताः भवन्ति। वामनस्य माधुर्य्यगुणः मम्मटस्य माधुर्य्यगुणे अन्तर्भवति। वामनस्य अर्थव्यक्तिगुणः

मम्मटस्य प्रसादगुणे अन्तर्भवति। इत्थं वामनस्य सप्तगुणाः मम्मटस्य गुणत्रयान्तर्गताः भवन्ति। अपरे ये वामनस्य शब्दगुणाः ते कथं दुष्टाः येन गुणत्वं नार्हन्ति तत् मम्मटः प्रकाशयति।

वामनस्य यः समतागुणः स दोषयुक्तः। यतः समतागुणः मार्गाभेदरूपः। अर्थात् श्लोकस्य आरम्भः यदि कोमलवर्णेन जातः तर्हि समापनमपि तेनैव क्रमेण भवेत्। यदि अयं नियमः स्यात् तर्हि समतागुणः भवति। परन्तु मम्मटः एतत् दोषस्थलमिति सूचयति।

"मातङ्गाः किमु वल्गितैः किमफलैराडम्भरैर्जम्बुका।
सारङ्गा महिषा मदं व्रजथ किं शून्येषु शूरान् के?
कोपाटोपसमुद्भटोत्कटसटाकोटेरिभारेः पुरः
सिंधुध्वानिनि हुंकृते स्फुरति यत् तद् गर्जितं गर्जितम्॥" [54]

अत्र श्लोके मसृणवर्णैः रचना जाता परन्तु यदि तेनैव क्रमेण समापनं भवेत् तर्हि अन्तिमे सिंहाभिधाने परुषवर्णाभावात् दोषो भवेत्। अतः समता न गुणत्वमर्हति। वामनस्य यः अपारुष्यरूपः सुकुमारगुणः तथा औज्वल्य-रूपकान्तिः एतौ द्वौ कष्टत्वग्राम्यत्व-दोषदूरीकरणेन सम्भवतः। अतः एतौ अपि न गुणौ। दोषरहितत्वं न गुणत्वमित्युक्तत्वात्। अनेन प्रकारेण वामनस्य दशशब्दगुणाः निरस्ताः।

अर्थगुणानाम् अन्तर्भावः –

वामनस्य दश-अर्थगुणान् खण्डयति मम्मटः। वामनस्य "श्लेषप्रसादादि क्रमेण दशशब्दगुणाः तेऽपि अर्थगुणनाम्ना प्रख्याताः।" केवलं लक्षणं भिन्नम्। मम्मटस्य मतेन एते दश-अर्थगुणाः अपि न समीचीनाः। यतः वामनस्य यः ओजोगुणः प्रौढ्यन्तर्गतः सः केवलं वैचित्र्यवाहकः। प्रौढेः पञ्चभेदेषु कथं वैचित्र्यमस्ति तत् आकलयन्तु –

"पदार्थे वाक्यरचना वाक्यार्थे च पदाभिदा।
प्रौढिर्व्यास-समसौ च साभिप्रायत्वमस्य च॥" [55]

१. "एकपदार्थस्य बहुभिः पदैः अभिधानं" पदार्थे वाक्यरचनम्। यथा – 'चन्द्र' इति वक्तव्ये चन्द्ररूपस्य एकपदार्थस्य अत्रिलोचनसमुत्थं ज्योतिरिति बहुभिः पदैरभिधानं केवलं वैचित्र्यमात्रम्।
२. बहूनां पदानामेकपदेन कथनम् "वाक्यार्थे च पदाभिदा"। यथा – कान्तार्थिनो लताकुञ्जं व्रजतीत्यादौ बहुपदवक्तव्ये केवलं "अभिसारिका" इति एकपदेन कथनम्। एतदपि वैचित्र्यमात्रम्।
३. एकस्य वाक्यस्य अनेकवाक्यैरभिधानं "व्यासः" (विस्तारः) यथा - "परस्वं नापहर्तव्यमिति"। या प्रौढिः ओज इत्युक्तः तद्वैचित्र्यमात्रं न गुणः। तदभावेऽपि काव्यव्यवहारप्रवृत्तेः। अपुष्टार्थत्वाधिकपदत्वानवीकृतत्वामङ्गलरूपाश्लोल ग्राम्याणां निराकरणेन च साभिप्रायत्वरूपमोजः, अर्थवैमल्यात्मा प्रसादः, उक्तिवैचित्र्यरूपं माधुर्यं, अपारुष्यरूपं सौकुमार्यम्, अग्राम्यत्वरूपा उदारता च स्वीकृता। अभिधास्यमानस्वभावोक्त्यलङ्कारेण रसध्वनिगुणीभूतव्यङ्ग्याभ्यां च वस्तुस्वभावस्फुटत्वरूपा अर्थव्यक्तिः दीप्तरसत्वरूपा कान्तिश्च स्वीकृता। क्रमकौटिल्यानुल्वणत्वोपपत्तियोगरूपघटनात्मा श्लेषोऽपि विचित्रत्वमात्रम्। अवैषम्यस्वरूपा समता दोषाभावमात्रं न पुनर्गुणः। [56]

त्रिषु गुणेषु अन्तर्भावः –

मम्मटादयः माधुर्य्य-औज-प्रसादाख्यान् त्रिगुणान् स्वीकुर्वन्ति। ते यथा- –

"माधुर्यौजः प्रसादाख्यास्त्रयस्ते न पुनर्दश"। [57]

तत्र माधुर्य्यस्य स्वरूप यथा-

"आह्लादकत्वं माधुर्य्यं शृङ्गारे द्रुतिकारणम्।
करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्॥" [58]

आह्लादकत्वं नाम आनन्दमयत्वम्। सम्भोगशृङ्गारे यावान् माधुर्यगुणः तिष्ठति ततोऽपि अधिकतया करुणे

ततोऽपि अधिकतया विप्रलम्भे ततोऽपि अधिकतया शान्ते तिष्ठति। माधुर्य्यगुणस्य व्यञ्जकवर्णाः यथा –

"मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघु।
अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा॥" [59]

यत्र ट-वर्गवर्जिताः स्पर्शवर्णाः वर्गान्त्य-वर्णेन युक्ताः भवन्ति; रकारः, णकारः, ह्रस्वाकारेण वर्त्तते; समासः न विद्यते तत्र माधुर्यगुणः भवति। उदाहरणं यथा –

"अनङ्गरङ्गप्रतिमं तदङ्गं
भङ्गीभिरङ्गीकृतमानताङ्ग्याः।
कुर्वन्ति यूनां सहसा यथैताः स्वान्वानि शान्तपरचिन्तनानि॥" [60]

ओजसः स्वरूपमेवं निरूपयामास –

"दीप्त्यात्मविस्मृतेर्हेतुरोजो वीररसस्थितिः।
बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च॥" [61]

दीप्तिर्नाम ज्वलितत्वमिव मनसः काचिदवस्था। या अवस्था वीररसे यथा वर्तते ततः अधिकत्वेन वीभत्से, ततोऽपि अधिकत्वेन रौद्रे वर्तते। ओजव्यञ्जकवर्णाः –

"योग आद्यतृतीयाभ्यामन्त्ययो रेण तुल्ययोः।
टादिः शषौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि॥" [62]

वर्गाणाम् आद्यवर्णाः तथा तृतीयवर्णाः तद् वर्गस्यान्त्यवर्णैः साकम् अर्थात् कचटतपाः खछठथफैः साकं तथा गजडदवाः घफढधभैः साकं यदा मिलिताः भवन्ति, रेफाकारेण (रेण) यत्र रकारः भवति तथा दीर्घसमासः विद्यते एवञ्च श्रवणमात्रेण मनसि दीप्तिरायाति तत्र ओजोगुणः भवति। यथा –

"मूर्ध्नामुद्वृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधारा-
धौतेशाङ्घ्रिप्रसादोपनतजयजगत्जातमिथ्यामहिम्नाम्।
कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां
दोष्णां चैषां किमेतत् फलमिहनगरीरक्षणे प्रयासः॥" [63]

प्रसादगुणस्य लक्षणमित्थं सूत्रयामास –

"शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यः।
व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहितस्थितिः॥" [64]

यथा अग्निः झटिति शुष्के इन्धने व्याप्नोति। परिष्कारे वस्त्रे यथा जलं हठात् प्रसरति, तथा यः गुणः चित्तमाप्नोति सः सर्वसाधारणः प्रसादाख्यो गुणः। प्रसादव्यञ्जकवर्णाः यथा –

"श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत्।
साधारणः समग्राणां स प्रसादो गुणो मतः॥" [65]

श्रवणमात्रेण यत्रार्थस्य प्रतीतिः भवति तत्र प्रसादगुणः। अयं सर्वसाधारणगुणः सर्वासु रचनासु प्रत्येकेषु समासेषु तिष्ठति। उदाहरणं यथा –

"परिम्लानं पीनस्तनजघनसंगादुभयत-
स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम्॥" [66]

उपसंहारः –

एवमात्मस्थानीयरसस्य धर्माः गुणाः । ते न दश संख्यकाः न वा विंशतिसंख्यकाः न वा चतुर्विंशतिसंख्यकाः अपि तु त्रिविधा इति । इति दिक्।

सन्दर्भसूची

1. नाट्यशास्त्रम् - पृ. २४३, श्लोकः - ९५
2. काव्यालङ्कारः - पृ. २, का- १,२ ।
3. वाग्भट्टालङ्कारः - पृ. ४७, का - २।
4. सरस्वतीकण्ठाभरणम् - पृ. १, परि. १, का- २ ।
5. सरस्वतीकण्ठाभरणम् - पृ. १२, परि. १, का- १३ ।
6. सरस्वतीकण्ठाभरणम् - पृ. १७, परि. १, का- ५९ ।
7. काव्यादर्शः - पृ. ७१, का- ४१,४२ ।
8. काव्यालङ्कारसूत्रम् - पृ. १५, का-७,८ ।
9. ध्वन्यालोकः- द्वि.उ.का-६ ।

10. काव्यप्रकाशः- अष्टम. का-६६ ।
11. काव्यप्रकाशः- अष्टम. का-६७ ।
12. साहित्यदर्पणम्- अष्टम.का-१ ।
13. साहित्यदर्पणम्-
14. रसगङ्गाधरः- पृ. १७२, वृ- ३४५, ३४६
15. तैत्तिरीयोपनिषत्- ११.७.१ ।
16. काव्यालङ्कारसूत्रवृत्तिः- तृतीय.अधि- प्रथम.अध्याय-४ ।
17. काव्यालङ्कारसूत्रवृत्तिः- तृतीय.अधि- प्रथम.अध्याय-५ ।
18. काव्यालङ्कारसूत्रवृत्तिः- तृतीय.अधि- प्रथम.अध्याय-६ ।
19. काव्यालङ्कारसूत्रवृत्तिः- तृतीय.अधि- प्रथम.अध्याय- पृ. ८।
20. काव्यालङ्कारसूत्रवृत्तिः- तृतीय.अधि- प्रथम.अध्याय-११ ।
21. कुमारसम्भवम् - प्रथमसर्गः-१।
22. काव्यालङ्कारसूत्रवृत्तिः- तृतीय.अधि- प्रथम.अध्याय-१२ ।
23. काव्यालङ्कारसूत्रवृत्तिः- तृतीय.अधि- प्रथम.अध्याय-पृ.९ ।
24. काव्यालङ्कारसूत्रवृत्तिः- तृतीय.अधि- प्रथम.अध्याय-१३ ।
25. काव्यालङ्कारसूत्रवृत्तिः- तृतीय.अधि- प्रथम.अध्याय-पृ.१०, उदा. १०.११ ।
26. काव्यालङ्कारसूत्रवृत्तिः- तृतीय.अधि- प्रथम.अध्याय-२१ ।
27. काव्यालङ्कारसूत्रवृत्तिः- तृतीय.अधि- प्रथम.अध्याय-२२ ।
28. काव्यालङ्कारसूत्रवृत्तिः- तृतीय.अधि- प्रथम.अध्याय-पृ.१५,उदा.१५ ।
29. काव्यालङ्कारसूत्रवृत्तिः- तृतीय.अधि- प्रथम.अध्याय-२३ ।
30. काव्यालङ्कारसूत्रवृत्तिः- तृतीय.अधि- प्रथम.अध्याय-पृ.१५, उदा.२३ ।
31. काव्यालङ्कारसूत्रवृत्तिः- तृतीय.अधि- प्रथम.अध्याय-२४ ।
32. काव्यालङ्कारसूत्रवृत्तिः- तृतीय.अधि- प्रथम.अध्याय-२५ ।
33. काव्यालङ्कारसूत्रवृत्तिः- तृतीय.अधि- प्रथम.अध्याय-पृ.१६, उदा.१८ ।
34. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-१ ।
35. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-पृ.२२, उदा-४-६ ।
36. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-३ ।
37. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-पृ.२४, उदा.८,९ ।
38. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-४ ।
39. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-पृ.२५, उदा.१० ।
40. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-५ ।
41. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-पृ.२६, उदा.११ ।
42. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-७ ।
43. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-११ ।
44. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-पृ.३२, उदा.१७ ।
45. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-१२ ।
46. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-पृ.३२, उदा-१२ ।
47. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-१३ ।
48. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-पृ.३३, उदा.१८ ।
49. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-१४ ।

50. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-पृ.३४, उदा.२० ।
51. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-१५ ।
52. काव्यालङ्कारसूत्रवृत्तिः-तृतीय.अधि, द्वितीयोऽध्यायः-पृ.३५, उदा.२२ ।
53. काव्यप्रकाशः-अष्टमोल्लासः-७२ ।
54. काव्यप्रकाशः-अष्टमोल्लासः-पृ.-४७९ ।
55. काव्यप्रकाशः-अष्टमोल्लासः-पृ.-४८० ।
56. काव्यप्रकाशः-अष्टमोल्लासः-पृ.-४८१ ।
57. काव्यप्रकाशः-अष्टमोल्लासः-सू-८९ ।
58. काव्यप्रकाशः-अष्टमोल्लासः-६८ ।
59. काव्यप्रकाशः-अष्टमोल्लासः-पृ.-६० ।
60. काव्यप्रकाशः-अष्टमोल्लासः-पृ.-४८५ ।
61. काव्यप्रकाशः-अष्टमोल्लासः-६९ ।
62. काव्यप्रकाशः-अष्टमोल्लासः-७५ ।
63. काव्यप्रकाशः-अष्टमोल्लासः-पृ.-४८६,३४८ ।
64. काव्यप्रकाशः-अष्टमोल्लासः-७० ।
65. काव्यप्रकाशः-अष्टमोल्लासः-७६ ।
66. काव्यप्रकाशः-अष्टमोल्लासः-पृ.-४८७,३४९ ।

सन्दर्भग्रन्थाः

१. नाट्यशास्त्र - भरतमुनि, सम्पादक-कन्हेयालाल जोशी, प्रकाशक-परिमल पब्लिकेशन्स २७/२८, शक्तिनगर दिल्ली-११०००७, द्वितीय संस्करण-१९८८
२. काव्यालङ्कारसूत्राणि - वामन, सम्पादक-डा.वेचन झा, प्रकाशक-चौखम्बा संस्कृत संस्थान, वाराणसी, संस्करण-पञ्चम वि.सं.२०४७
३. काव्यालङ्कारसूत्रवृत्तिः - वामनः सम्पादकः-पण्डित केदारनाथशर्मा, पञ्चमसंस्करण-चौखम्बा कृष्णदास अकादमी, वाराणसी
४. काव्यालङ्कारः - भामहः, सम्पादकः- प्रो.देवेन्द्र नाथ शर्मा, प्रकाशक- विहार राष्ट्रभाषापरिषद्, पाटना, २०१९ विक्रमाब्द १८८४ शताब्दः, १९६२ ख्रीष्टाब्दः
५. काव्यप्रकाश - मम्मट, सम्पादक - रघुनाथ दामोदर कमरकार, प्रकाशक-ज्ञानमण्डल ग्रन्थमाला, वाराणसी, पञ्चम संस्करण-२०३१ संवत्
६. काव्यप्रकाशः - वामानाचार्य रामभट्ट फलकीरा, चौखम्बा संस्कृत प्रतिष्ठान-दिल्ली
७. काव्यादर्शः - दण्डी, सम्पदकः - आचार्य रामचन्द्रमिश्र, प्रकाशक-विद्याभवन संस्कृत ग्रन्थमाला-३७, विं.सं.-२०१५ इ. १९५८
८. ध्वन्यालोकः - आनन्दवर्द्धनः, सम्पादक-पण्डित श्री शोभित मिश्र, प्रकाशक-चौखम्बा संस्कृत सीरीज अफिस, वाराणसी, संस्करण-तृतीय संवत् २०२९
९. साहित्यदर्पण - विश्वनाथ कविराजः, सम्पादक-कृष्णमोहन शास्त्री, प्रकाशकः-चौखम्बा संस्कृत सीरीज् अफिस, वाराणसी-१संस्करण-तृतीय विं.तं-२०१३
१०. रसगङ्गाधरः - पण्डितराज जगन्नाथ, सम्पादक-पं.वद्रीनाथ झा, प्रकाशक-चौखम्बा विद्याभवन, वाराणसी, संस्करण-तृतीय-१९७०
११. वाग्भट्टालङ्कारः - वाग्भट्टः, सम्पादक-पण्डित मुरलीधर शर्मा, प्रकाशक-श्रवेड्.क्टेश्वर ष्टीम्, वम्बे, संस्करण-संवत्-२०१३
१२. सरस्वतीकण्ठाभरणम् - भोजः, सम्पादक-अनुन्दोरम् वरूआ, प्रकाशक-चौखम्बा ओरिएण्टाल, संस्करण-प्रथमम्, १८८०,